# अम्बापञ्चरत्नस्तोत्रम्

अम्बाशम्बरवैरितातभगिनी श्रीचन्द्रबिम्बानना
बिम्बोष्ठी स्मितभाषिणी शुभकरी कादम्बवाट्याश्रिता ।
ह्रीङ्काराक्षरमन्त्रमध्यसुभगा श्रोणीनितम्बाङ्किता
मामम्बापुरवासिनी भगवती हेरम्बमातावतु ॥ १॥

कल्याणी कमनीयसुन्दरवपुः कात्यायनी कालिका
काला श्यामलमेचकद्युतिमती कादित्रिपञ्चाक्षरी ।
कामाक्षी करुणानिधिः कलिमलारण्यातिदावानला
मामम्बापुरवासिनी भगवती हेरम्बमातावतु ॥ २॥

काञ्चीकङ्कणहारकुण्डलवती कोटीकिरीटान्विता
कन्दर्पद्युतिकोटिकोटिसदना पीयूषकुम्भस्तना ।
कौसुम्भारुणकाञ्चनाम्बरवृता कैलासवासप्रिया
मामम्बापुरवासिनी भगवती हेरम्बमातावतु ॥ ३॥

या सा शुम्भनिशुम्भदैत्यशमनी या रक्तबीजाशनी
या श्री विष्णुसरोजनेत्रभवना या ब्रह्मविद्याऽऽसनी ।
या देवी मधुकैटभासुररिपुर्या माहिषध्वंसिनी
मामम्बापुरवासिनी भगवती हेरम्बमातावतु ॥ ४॥

श्रीविद्या परदेवताऽऽदिजननी दुर्गा जया चण्डिका
बाला श्रीत्रिपुरेश्वरी शिवसती श्रीराजराजेश्वरी ।
श्रीराज्ञी शिवदूतिका श्रुतिनुता शृङ्गारचूडामणिः
मामम्बापुरवासिनी भगवती हेरम्बमातावतु ॥ ५॥

अम्बापञ्चकमद्भुतं पठति चेद्यो वा प्रभातेऽनिशं
दिव्यैश्वर्यशतायुरुत्तममिदं विद्यां श्रियं शाश्वतम् ।
लब्ध्वा भूमितले स्वधर्मनिरतां श्रीसुन्दरीं भामिनीं
अन्ते स्वर्गफलं लभेत्स विबुधैः संस्तूयमानो नरः ॥ ६॥

इति अम्बापञ्चरत्नस्तोत्रं समाप्तम् ॥